# २ द्वितीय दशकः - हयग्रीव कथा

रणेषु दैत्येषु हतेषु देवाः पुरा प्रहृष्टाः सहदातृ शर्वाः ।
यियक्षवो यज्ञपतिं विनीताः प्रपेदिरे विष्णु मनन्त वीर्यम् ॥ २-१॥

दृष्ट्वा च निद्रा वशगं प्रभुं तम् अधिज्य चापाग्र समर्पितास्यम् ।
आश्चर्य मापु र्विबुधा न कोऽपि प्राबोधयत्तं खलु पाप भीत्या ॥ २-२॥

हरेस्तदानी मजसृष्ट वम्र्या मुखार्पणा कुञ्चित चाप मौर्वी ।
भग्ना धनुश्चार्जव माप सद्यः तेनाभवत्सोऽपि निकृत्त कण्ठः ॥ २-३॥

कायाच्छिरस्तूत्पतितं मुरारेः पश्यत्सु देवेषु पपात सिन्धौ ।
चेतः सुराणां कदने निमग्नं हाहेति शब्दः सुमहानभूच्च ॥ २-४॥

किमत्र कृत्यं पतिते हरौ नः कुर्मः कथं वेति मिथो ब्रुवाणान् ।
देवान् विधाताऽऽह भवेन्नकार्यं अकारणं दैवमहो बलीयः ॥ २-५॥

ध्यायेत देवीं करुणार्द्र चित्तां ब्रह्माण्ड सृष्ट्यादिक हेतु भूताम् ।
सर्वाणि कार्याणि विधास्यते नः सा सर्वशक्ता सगुणाऽगुणा च ॥ २-६॥

इत्यूचुषः प्रेरणया विधातुः त्वामेव वेदा नुनुवुः सुराश्च ।
दिवि स्थिता देवगणांस्त्व मात्थ भद्रं भवेद्वो हरिणेदृशेन ॥ २-७॥

दैत्यो हयग्रीव इति प्रसिद्धो मयैव दत्तेन वरेण वीरः ।
वेदान् मुनींश्चापि हयास्य मात्र वध्यो भृशं पीडयति प्रभावात् ॥ २-८॥

दैवेन कृत्तं हरिशीर्ष मद्य संयोज्यतां वाजि शिरोऽस्य काये ।
ततो हयग्रीव तया मुरारिः दैत्यं हयग्रीव मरं निहन्ता ॥ २-९॥

त्वमेव मुक्त्वा सदयं तिरोधाः त्वष्ट्रा कबन्धे ऽश्वशिरो मुरारेः ।
संयोजितं पश्यति देवसङ्घे हयाननः श्रीहरि रुत्थितो ऽभूत् ॥ २-१०॥

दैत्यं हयग्रीव महन् हयास्यो रणे मुरारि स्त्वदनुग्रहेण ।
सदा जगन्मङ्गलदे त्वदीयाः पतन्तु मे मूर्ध्नि कृपा कटाक्षाः॥ २-११॥

** ज्ञानानन्द मयं देवं निर्मल स्फटिका कृतिम् ।
आधारं सर्व विध्यानां हयग्रीवं उपास्महे ॥ **